National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2019; 1(23): 80-83
© 2019 NJHSR
www.sanskritarticle.com

**मुकेश कुमार:**
शोधछात्र, पुराणेतिहासविभाग:,
श्रीलालबहादुरशास्त्री राष्ट्रिय संस्कृत-विद्यापीठम्,नवदेहली-110016

**Correspondence:**
**मुकेश कुमार:**
शोधछात्र, पुराणेतिहासविभाग:,
श्रीलालबहादुरशास्त्री राष्ट्रिय संस्कृत-विद्यापीठम्,नवदेहली-110016

# आधुनिक सन्दर्भे मत्स्यपुराणोक्त पर्यावरणस्य प्रासङ्गिकता

**मुकेश कुमार:**

**संक्षिप्तिका :-** पुराणवाङ्मये मत्स्यपुराणस्य महत्त्वं सर्वाधिकं विद्यते। पुराणेऽस्मिन् १५३ अध्यायेषु संसारस्य विविधविषयाणां वर्णनं प्रतिपादितम्।[1] एतेषु अध्यायेषु मत्स्यावतारस्य सूदीर्घविवेचनं व्याख्यायितम् । एतेषु अध्यायेषु प्रकृते: वर्णनं सारांशरूपेण लिखितमस्ति। अस्य पुराणस्य अपर नाम आदिपुराणं वर्तते। संसारस्य प्राकृतिकचिन्तनविषये परिचर्चा मत्स्यपुराणे एव व्याख्यायितम्।

प्रकृतिमाध्यमेन एव संसारस्य सर्वविधकार्याणां संचालनं भवति। शब्दकल्पद्रुमग्रन्थे लिखितमस्ति यत् – प्रकृते: शब्दे प्र+कृ+ क्तिन् प्रयोगं भूत्वा प्रकृति: शब्दस्य स्पष्टीकरणं भवति।[2] प्रकृतिमाध्यमेन एव सर्वेषां कार्याणां सिद्धि: भवति । अनेन प्रकारेण एव सर्वप्रथमं प्रकृते: स्वरूपमत्र प्रतिपादितम् –

•**प्रकृति:** - स्वभाव: एव प्रकृति: । यथा आह्लादकम् औषधीनां प्रकृत्यानुसारेण स्वभाविकं गुणं भवति।
•**प्रकृति:** - राज्यस्य संविधायी तत्त्वानां प्रकृति:।
•**प्रकृति: -** पुरवासीजनानां प्रकृति:।
•**प्रकृति:** - स्वस्वरूपाणां स्वबहविकी प्रकृते: स्वरूपम् ।
•**प्रकृति: -** प्रकर्षेण सृष्ट्यादि करोति सा प्रकृति:।[3]

अनेन प्रकारेण प्रकृतिविषये विविधानां विचाराणां वर्णनं समुपलभ्यते। अस्मिन् प्रसङ्गे ब्रह्मवैव्रतपुराणे लिखितम् – दुर्गा-सरस्वती-लक्ष्मी-राधा-गंगातुलसी – मनसी-षष्ठी-मंगल-चण्डी इत्यादिरूपेषु प्रकृति: स्वरूपसिद्धिं प्रददाति।[4] शब्दकोशग्रन्थेषु प्रकृत्या: विषये विविधविषयाणां वर्णनं विद्यते।

**विषयवस्तु: -** संस्कृतसाहित्यस्य विविधेषु ग्रन्थेषु प्रकृते: स्वरूपं द्विधा प्रकारेण सिद्धं भवति। तत्र द्विधा प्रकृतिनां विवेचनं प्रतिपादितम् । यथा – मनुष्यस्य अन्त: प्रकृति: तथा च् मनुष्यस्य बाह्यप्रकृति: भवति। अन्तप्रकृतिमध्येऽपि श्रेष्ठविचाराणां प्रभाव: भवति। यथाप्रकारेण पर्यावरणीय तत्त्वानां संयुक्तेन वा प्रयोगेन मनुष्यप्रकृते: परिवर्तनं भवति। सांसारिकपदार्थेषु आकाश: वर्षा सूर्य चन्द्रमस: ऋतव: इत्यादय: मानवनिर्मिता नैव सन्ति। परञ्च एतेषां सर्वेषां प्रयोगेन मनुष्यस्य प्रकृत्यां परिवर्तनं भवति।

भारतीयदर्शनानुसारेण मनुष्यस्य आभ्यन्तरप्रकृत्यां मनस्-बुद्द्धि-अहंङ्कार-पृथ्वी-जल-तेज-वायु-आकाशादीनां वर्णनं प्रतिपदितम्।[5] अनेन प्रकारेण आभ्यन्तरप्रकृतितत्त्वेषु मनुष्य: अधिकं मननं करोति। अनेन मननेन स: वातावरणं वा पर्यावरणानुसारेण सांसारिककार्याणां संचालनं करोति। तेषु कार्येषु पर्यावरणस्य सर्वाधिकं प्रभाव: विद्यते।

प्रकृति: संसारस्य सर्वाधिकं महत्त्वपूर्णं भागं वर्तते। अस्यां विविधतत्त्वानां समावेशो भवति। प्रकृते: पर्यावरणस्य सम्बन्धो परस्परं पूरकोऽस्ति। प्रकृत्यां विविधतत्त्वानां परिगणना भवति। सर्वेषु तत्त्वेषु पञ्चमहाभूतानां महत्त्वं सर्वाधिकं योगदानरूपेण परिगण्यते। अनेन प्रकारेण पर्यावरणस्य व अप्रकृते: पञ्चमहाभूतानां सिद्धि: व्याख्यानम् अति आवश्यकं भवति। मनूष्योऽपि प्रकृते: एव तत्त्वम् ।

प्राचीनकालाद् आरभ्य इदानीं पर्यन्तं मनुष्य: एव स्वविवेकानुसारेण प्रकृते: संरक्षणं करोति। प्रकृते: संरक्षणकार्ये नदी-कूप-तडागादीनां संरक्षणं सरवधिकं महत्त्वपूर्णम्।[6] मनुष्य: यदा कुपेषु जलाश्येषु मलमूत्रादीनां क्षेपणं करोति। तदा पौराणिकचिन्तनधारा एतस्य दृढताया: विरोधं करोति। यतोहि जलादयप्राकृतिकसंसाधनानि प्रकृते: महत्त्वपूर्णानि अङ्गानि सन्ति।

स्कन्धपुराणे अस्मिन् प्रसङ्गविषये लिइखितम् – ये जना: जलसाधनेषु मलमूत्रादीनां परित्यागं कुर्वन्ति। ते पापस्य भागिन: भवन्ति।[7]

**प्रकृति: शब्दस्य अर्थस्वरूपम् :-** संसारेऽस्मिन् मनुष्य: सर्वाधिकं विवेकीप्राणी रूपेण प्रतिष्ठितोऽस्ति। मानवस्य जीवने सहायकतत्त्वानां पर्यावरणस्य वा प्रकृते: महत्त्वपूर्णा भूमिका भवति। यतोहि मनुष्य प्रकृते: सहायं सर्वाधिकं सामञ्जस्य स्थापयति। प्रकृते: सर्वाविधतत्त्वानां प्रयोगं मनुष्य: एव करोति। प्रकृते: तत्त्वानां साहये प्राचीनऋषीणां समबन्ध: आत्महृदयेन संयुक्तमासीत् ।प्राचीनऋषय: स्वक्षतमतानुसारेण प्रकृते: भोग्यं कुर्वन्ति स्म। प्राचीनऋषय: स्वसाधनाया: समय: प्रकृते: सहितं भूत्वा कुर्वन्ति स्म। प्रकृते: संरक्षय ऋषय: पदे पदे उपदेशं कृतवन्त:।

**प्रकृतिसंरक्षणस्य व्युत्पत्ति: क्षेत्रनिर्धारणम् च :-** प्रकृते: संरक्षणाय क्षेत्रनिर्धारणे सर्वप्रथमं प्रकृते: प्रमुखतत्त्वानां संरक्षणस्य आवश्यकता भवति। प्रकृते: क्षेत्रं तु यद्यपि व्यापकं भवति।

तस्य सामन्यतया समीक्शा कर्तुं नैव शक्नुवन्ति। तथापि अत्र कतिपय शोधपरकाधिगमानुसारेण प्रकृते: संरक्षण्स्य क्षेत्रनिर्धारणं प्रतिपादितम्।[8] यथा प्रकारेण –

**१. प्रकृते: मानीय अन्तर्समबन्धनां वर्णनम् ।**
**२. प्रकृते: स्वरूपं तथा च पर्यावरणीय तन्त्रस्य वर्णनम् ।**
**३. प्रकृते: प्रबन्धनस्य कार्याणां विवेचनम् ।**

अनेन प्रकारेण एव प्रकृते: संरक्षणाय अन्यानि प्रमुखा: बिन्दव: भवन्ति। तेषां वर्णनमत्र दीयते।[9]

**१.प्राकृतिकं संसाधनानां संरक्षणम्।**
**२. प्राकृतिकं जलीयस्रोतानां संरक्षणम् ।**
**३. वृक्षाणां संरक्षणम् ।**
**४. पर्वतानां संरक्षणम् ।**
**५. अग्नि: तेज: ऊर्जाया: संरक्षणम् ।**
**६. प्राकृतिकम् औषधीनां संरक्षणम् ।**
**७. फलानां संरक्षणम् ।**
**८. शाकानां संरक्षणम् ।**
**९. प्राकृतिकं पदार्थानां संरक्षणम् ।**
**११. पृथ्वी आधारितं वस्तूनां संरक्षणम् ।**
**१२. वन्यजीवानां संरक्षणम् ।**
**१३. राष्ट्रीयोद्यानानां संरक्षणम् ।**
**१४. खनीजपदार्थानां संरक्षणम् ।**
**१५. प्राकृतिकं गैसानां संरक्षणम् ।**

उपरोक्तानां सर्वेषां बिन्दूनां प्रकृति: संरक्षणे आवश्यकता भवतियदि मनुष्य: एतेषां संरक्षणं नैव करिष्यति चेत् भविष्यत्काले मनुष्याय विविधसमस्यानां प्रभाव: भविष्यति। अत: प्रकृते: संरक्षणम् अति आवश्यकं वर्तते। प्रकृते: संरक्षणाय यद्यपि बहुविध कार्याणां सर्वेषां कृते आवश्यकता भवति। परञ्च मुख्यतया पञ्चभूतानि मानवस्य सर्वाधिकं प्रमुखाङ्गानि सन्ति। तेषां वर्णनमत्र दीयते।

**१. पृथ्वे: संरक्षणम् ।**
**२. जलस्य संरक्षणम् ।**
**३. तेजस्य संरक्षणम्।**
**४. वायो: संरक्षणम् ।**
**५. आकाशस्य संरक्षणम् ।**

**मत्स्यपुराणे वर्णिताणां विषयाणां विवेचनम् :-** मत्स्यपुराणे पदे पदे प्रकृति संरक्षणस्य विषया: प्रतिपादित सन्ति । यथा –

**१. सृष्टिप्रकरणम्**
**२.मरुड् गणोत्पत्तिवर्णनम्**
**३. मन्वन्तरा वर्णनम्**
**४. पृथ्वी दोहनम्**
**५. आदित्याख्यानम्**
**६. सूर्यवंशवर्णनम्**
**७. श्राद्धप्रकरणम्**
**८. अग्निवंशप्रकरणम्**
**९. नक्षत्रपुरूषं नाम व्रतकथनम्**
**१०. तडागारामकूपादीनां प्रतिष्ठाविधिवर्णनम्**
**११. सप्तलोकाधिपत्यप्राप्तिव्रतकथनम्**
**१२. चन्द्रादित्योपरागे स्नानवधिकथनम्**
**१३. नवग्रहस्वरूपवर्णनम्**
**१४. स्नानमहत्त्ववर्णनम्**
**१५. प्रायागमाहात्म्यम्।**

अनेन प्रकारेण मत्स्यपुराणे पर्यावरणस्य संदर्भे बहव: विषया: उल्लिखिता: सन्ति।

**मत्स्यपुराणे ब्रह्माणस्य परिकल्पना रक्षणञ्च :-**

मत्स्यपुराणस्य प्रारम्भे सर्वप्रथमं मङ्गलाचरणस्य वर्णनं विद्यते। अत्र त्रिविधस्वरूपं शिवशम्भूशिवशङ्करस्य चरणाभ्यां नमस्कृत्य सर्वविधविघ्नानां विनाशकामनां कृत्वा अम्बाभगवतीं सरस्वतीं प्रणमाञ्जलि कृता अस्ति। पुराणस्य प्रारम्भे नैमिशारण्यस्य शौनाकादिऋषिजना: सूतं विष्णो: संदर्भे पृच्छन्ति। तदा ऋषिसूत: कथयति यत् – विष्णो: एव मत्स्यरूपेण संसारस्य कर्ता अस्ति।

पुराणेऽस्मिन् वर्णितमस्ति यत् – प्राचीनकाले सूर्यपुत्र महर्षि मनु तपस्यारतो आसीत्। तस्य तपस्यां दृष्टवा भगवत्ब्रह्माणा प्रसन्नोऽभूत्। तदनन्तरं मनुना साधनावस्थायां हस्तौ एका मत्स्यं प्राप्तम्। सा प्रतिदिने सुदीर्घा जाता। अन्ते च तस्या स्वरूप सागरेऽपि न समाहितम्। तदा मनु महर्षिणा अपृच्छत् – कोऽस्ति भवान् ? सा उक्तवती – अहमेव विष्णु: अस्मि। संसारेऽस्मिन् मया आगमनं शीघ्रतया भविष्यति। सर्वेषां प्राणिनां भवानेव रक्षणं करिष्यन्ति। अनेन प्रकारेण अत्र विस्तारपूर्वकं प्रतिपादितमस्ति यत् – मत्स्यपुराणे ब्रह्माणस्य परिकल्पना कृता एवञ्च तस्य रक्षणविषयेऽपि विशिष्टं वर्णनं विद्यते।[10]

**मत्स्यपुराणे ब्रह्माण्डै पर्यावरणशुद्धि विवेचनम् :-**

नारदीयपुराणानानुसारं यस्मिन् पुराणे वेदविदा भगवता व्यासेन नरसिंहवर्णनमारभ्य सप्तानां कल्पानां वृत्तान्तं संक्षेपेण निगदितमस्ति तदेव मत्स्यपुराणनाम्ना प्रसिद्धम्, यस्य श्लोकसंख्या चतुर्थशसहस्राणि सन्ति-

**अथ मात्स्यं पुराणं ते प्रवक्ष्ये द्विजसत्तम्।**
**यत्रोक्तं सप्तकल्पानां वृत्तं संक्षिप्य भूतले॥**
**व्यासेन वेदविदुषां नरसिंहोपवर्णनम्॥**
**उपक्रम्य तदुद्दिष्टं चतुर्दश सहस्रकम्॥**[11]

किन्तु स्वयं मत्स्यपुराणे लिखितमस्ति यस्मिन् पुराणे कल्पादौ भगवता जनार्दन मत्स्यरूपेण मनवे श्रुतीनां प्रवृत्यर्थं नरसिंहवर्णनप्रसङ्गे सप्तानां कल्पानां विषयवर्णनं कृत तदेवास्ति चतुर्दशसहस्रात्मकं मत्स्यपुराणम् –

**श्रुतीनां यत्र कल्पादौ प्रवृत्यर्थं जनार्दनः।**
**मत्स्यपुराणे मनवे नरसिंहस्य वर्णनम्।।**
**अधिकृत्याब्रवीत् सप्तकल्पव्रत्तं मुनीश्वराः।**
**तन् मत्स्यमिति जानीध्वं सहस्राणि चतुर्दश॥**[12]

एवं रेवामाहात्म्य श्रीमद्भागवत-ब्रह्मवैवर्तादिपुराणानुसारमपि अत्र १४००० श्लोकाः सन्ति २९० अध्यायाश्च विद्यन्ते। अनेन प्रकारेण ज्ञायते यत् पुराणमिदं पर्यावरणशुद्धिविवेचनं करोति। अस्य अध्ययनेन प्रकृतिसंरक्षणस्य ज्ञानं भवति।

**मत्स्यपुराणे भौगोलिकपर्यावरणम् :-**

मत्स्यपुराणे न केवलं भूमिगोलकस्य पर्यावरणमाश्रृत्य तत् शुद्धये विचारः कृतः। अपितु समग्रब्रह्माण्डस्य पर्यावरणशुद्धये विमर्शः उपनियशयताः परितः आवरणं पर्यावरणमिति व्युत्पत्त्यानुसारं यत् यत् वस्तु अस्माकं परितः आवरणवत् तिष्ठाति तत् अस्माकं पर्यावरणं भवति। अस्माकं परितः किम् किमस्ति जिज्ञासायां यदि विचारयते तदा पृथ्वी-जल-तेज-वायु-आकाशादि भूतानि एतेषां बीजानि तन्मात्ररूपाणि शब्द-स्पर्श-रूप-रस-गन्धादीनि कालश्च तिष्ठति।

एभिः सैव मनोबुद्धिः अहङ्कारादि अन्तःकरणं तथा च नित्यशुद्ध-बुद्ध- प्रत्यागात्म विशिष्टचैतन्यमपि परितः तिष्ठति। एतत् सर्वं पर्यावरणमस्ति। पुराणेऽस्मिन् पर्यावरणस्य शुद्धयात्म यत् कर्म क्रियते शान्तिपौष्टिककर्म इति नाम्ना वर्णितम्। यथा :-

**वैशम्पायनमासीनपृच्छच्छौनकः पुरा।**
**सर्वकामाप्तये कथं शान्तिकपौष्टिकम्॥**
**श्रीकामः शान्तिकामो वा ग्रहयज्ञं समारभेत्।**
**वृष्ट्यायुः पुष्टिकामो वा तथैवाभिवरन् पुनः॥**
**येन् ब्रह्मन् विधानेन तन्मे निगदतः श्रृणु॥**
**सर्वशास्त्रण्यनुक्रम्य संक्षिप्य ग्रन्थविस्तरम्।**
**ग्रहशान्तिं प्रवक्ष्यामि पुराणश्रुतिचोदिताम्॥**
**पुण्येऽह्नि विप्रकथिते कृत्वा ब्राह्मणवाचनम्।**
**ग्रहान् ग्रहाधिदेवांश्च स्थाप्य होमं समाचरेत्॥**[13]
**एतत् शान्तिपौष्टिककर्म त्रिधाहोमात्मकं भवति ।**
**ग्रहय्यज्ञस्त्रिधा प्रोक्तः पुराणश्रुतिकोविदैः॥**
**प्रथमोऽयुतहोमः स्याल्लक्षहोमस्ततः परम्।**
**तृतीयः कोटिहोमस्तु सर्वकामफलप्रद॥**
**अयुतेनाहुतीनां च नवग्रहमखः स्मृतः।**[14]

**प्राकृतिकदेवानां स्तुतिपाठम् :-**

प्राचीनकाले जनाः स्वकार्यसिद्धयर्थं प्राकृतिकदेवानां स्तुतिकार्यं कुर्वन्ति स्म। प्राकृतिकदेवेषु अग्नि-इन्द्र-रुद्र-सूर्य-उषस्-सवितृ-वरूणादीनां जनाः स्तुतिं कुर्वन्ति स्म। वैदिकसाहित्ये अस्य विषये वर्णनं पदे पदे समुपलब्धम् । तद्यथा -

- **आकृष्णेन रजसा**[15] इति मन्त्रेण सूर्यस्य आवाहनं करणीयम् ।
- **आप्यायस्वः**[16] इति मन्त्रेण चन्द्रमसः आवाहनं करणीयम् ।
- **अग्निमुर्धा दिवः ककुत्**[17] इति मन्त्रेण मङ्गलस्य आवाहनं करणीयम्।
- **अग्ने विवस्वदुषस्**[18] इति मन्त्रेण बुधस्य आवाहनं करणीयम्।
- **इदं विष्णु**[19] इति मन्त्रेण विष्णोः आवाहनं करणीयम् ।

**पर्यावरणे यज्ञस्य महत्त्वम् :-**

पर्यावरणस्य शुद्धकरणार्थं यज्ञस्य महत्त्वं सर्वत्र प्रतिपादितमस्ति। अस्य विषये मत्स्यपुराणेऽपि विस्तरेण वर्णनं विद्यते। यज्ञसमये पवित्रजलैः सर्वप्रथमं पवित्रिकरणं भवति। तदनन्तरं यजमानस्य सपत्नीकस्य तथा च मण्डपे उपविष्टानां जनानामभिसेचन् कृत्वा विप्रः यज्ञस्य प्रारम्भं कुर्वन्ति। घृतसहितं हविप्रदानेन मन्त्रसहितम् अस्य यज्ञस्य प्रारम्भः भवति। तद्यथा –

**अथाभिषेकमन्त्रेण वाद्यमङ्गलगीतकैः।**
**पूर्णकुम्भेन तेनैव होमान्ते प्रागुदङ्मुखम्॥**
**अस्त्राणि सर्वशास्त्राणि राजानो वाहनानि च।**
**औषधानि च रत्नानि कालस्याववाश्च ये॥**
**सरितः सागराः शैलास्तीर्थानि जलदा नदाः।**
**एते त्वामभिषिञ्चन्तु सर्वकामार्थसिद्धये॥**
**ततः शुक्लाम्बरः शुक्लगन्धानुलेपनः।**
**यजमानः सपत्नीकः ऋत्विजः सुसमाहितान्।।**
**दक्षिणाभिः प्रयत्नेन पूजयेद् गतविस्मयः॥**[20]

अनेन प्रकारेण पुराणेऽस्मिन् यज्ञस्य महत्त्वं प्रतिपादितम् यज्ञस्य प्रारम्भे सर्वविधदेवानामावाहनं भवति। तदनन्तरं सर्वेभ्यः हविदानं क्रियन्ते। सर्वविधग्रहानां शान्तिपाठ भवति। हविप्रदाने यज्ञे घृतं,जलं, पुष्पं, वस्त्रं, दधिं,धान्यं, दूर्वा, नारिकेलं, फलमित्यादीनां प्रदानं कृत्वा मन्त्रसहितं पर्यावरणशुद्ध्यर्थं होमकार्यः प्रचलति। यज्ञस्य विषये वैदिक साहित्ये लिखितं – यज्ञमैव ब्रह्मस्वरूपः। यज्ञमेव श्रेष्ठतरो कर्मः। पर्यावरणसंरक्षाय यज्ञः विशिष्टभूमिकां प्रददाति।

**प्रकृतिसंरक्षणस्य तात्पर्यम् :-**

प्रकृतिसंरक्षणस्य तात्पर्यं भवति – प्राकृतिकसंसाधनां योजनाबद्धसहितं विवेकपूर्वकं सदुपयोगम्। अनेन सर्वविधसाधनानां सुरक्षा भवति। सर्वप्रथमं तु प्राकृतिकसंसाधनानां सुरक्षा करणीया। तदनन्तरं तेषां प्रति श्रद्धापूर्वेण समाजे सचेतनायाः सञ्चारः करणीयः । भविष्यगत समाजस्य कृते प्राकृतिकसंसाधनानां त्यागपूर्वकमुपयोगं करणीयम्।

**उपसंहारः -** अन्ते च उपसंहार रूपेण वक्तुं शक्यते यत् – मत्स्यपुराणोक्तं पर्यावणस्य वर्तमाने प्रासङ्गिकता वर्तते। यतोहि प्राचीनकालादेव मानवस्य सम्बन्धः प्रकृतेः साकं विद्यते। समयानुसारेण मानवः प्रकृतेः साकं समायोजनं स्थापयति। प्राकृतिकसंरक्षणस्य सम्बन्धः मानवेन सह सामाजिकं-वैज्ञानिकं-रसायनिकं-भैतिकं- जैविकं- भूवैज्ञानिकमित्यादयसंयुक्तं वर्तते। मानवः स्वजीवोकोपार्जनाय प्रतिदिने प्राकृतिकसंसाधनानां सदुपयोगं करोति। प्रकृतिप्रदत्तसंसाधनानि मनुष्याय लाभकारी भवन्ति। त्यागपूर्वकं यदा मानवः प्रकृतेः उपभोगं करोति तदा तु सर्वं समीचीनम्। परञ्च स्वस्वार्थकार्यपूरणाय सैव प्राकृतिकसंसाधनानां दुरुपयोगं करोति तदा प्रकृतेः हानिः भवन्ति। प्राकृतिकचक्रं प्रभावितं भवति। अस्माकं भारतीय संस्कृत्यां प्रकृतिसंरक्षण विषये सर्वं पूर्वमेव लिखितम् –

**"ईशावास्यमिदं सर्वं यत् किंञ्च जगत्यां जगत्।**
**तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद् धनम्"॥**[21]

अर्थात् संसारेऽस्मिन् यत् किमपि विद्यते तस्य त्यागपूर्वकमुपभोगं करणीयम्। कस्यापि मानवस्य प्रति हिंसायुक्तभावना न करणीया। कस्यापि धनस्य प्रति नकारात्मकं दृष्टिकोणं न भवेत्। संसारे मानवाय प्रकृतिप्रदत्तः विविधसंसाधनानि सन्ति। तेषां सदा सदुपयोगं करणीयम्। प्राकृतिकसंसाधनानां सदुपयोगार्थं सामाजिकस्त्तरे जागरूकता संदेशः प्रदातव्यम्।

**संदर्भ ग्रन्थ सूचीः -**

१.मत्स्यपुराणम् ,गीताप्रेस गोरखपुर ,२९३००५
२.पुराणपर्यायलोचनम् , डॉ० कृष्णमणित्रिपाठी, डॉ०विश्वनाथः पाण्डेयः, चौखम्बा सुरभारती प्रकाशन, वाराणसी, संस्करणम्,२०१२
३.संस्कृत वाङ्मय में पर्यावरण चिन्तन , डॉ० राजेश, सत्यम् पब्लिशर्स हाऊस , २०१५
४.२१ वीं सदी में पर्यावरण एवं पर्यावरण शिक्षा, सन्तोष मित्तल, स०,२००४
५.पर्यावरण एवं भारतीय नारी, डॉ०ज्योत्स्ना मोहन, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम् नवदेहली,२०१५
६.पर्यावरणीय शिक्षा , डॉ०सत्यनारायण दुबे , स०,२०१२

**संदर्भ ग्रन्थः -**

1. पर्यावरण एवं पर्यावरण शिक्षा, भूमिका, पृ०, 3
2. संस्कृत वाङ्मय में पर्यावरण, पृ०, 30
3. तदेव, पृ०,43
4. ब्रह्मवैव्रतपुराणे प्रतिपादितम्
5. भारतीयदर्शने वर्णितम्
6. पर्यावरण एवं भारतीय नारी,पृ०, 3 से 13
7. स्कन्दपुराणे वर्णितम्
8. 21 वीं सदी में पर्यावरण एवं पर्यावरण शिक्षा,पृ , 4.7
9. पर्यावरणीय शिक्षा, डॉ० सत्यनारायण दूबे, पृ०, 3-23
10. मत्स्यपुराणम्,प्रथमोऽध्यायः
11. नारदपुराणम् ,107/1,2
12. मत्स्यपुराणम् ,53
13. मत्स्यपुराणम् ,93 / 1-4
14. मत्स्यपुराणम् ,93 / 5-6
15. शुक्लयजुर्वेदसंहिता, 33/43
16. शुक्लयजुर्वेदसंहिता,12/14
17. शुक्लयजुर्वेदसंहिता,13/14
18. ऋक्संहिता,1/44/1
19. शुक्लयजुर्वेदसंहिता,5/15
20. मत्स्यपुराणम्,93/ 49-59
21. ईशावास्योपनिषद् ,1